पद्मपुष्पवाटिका

रचियता—

लछमनसिंहः अग्रवालः

एम. ए.

© लछमनसिंहः अग्रवालः
सर्वाधिकाराः सुरक्षिताः

प्रथमम् संस्करणम्
अक्तूबर १९८३

मूल्यम्—६) रु०

पद्मपुष्पवाटिका

रचियता—
लछमनसिंहः अग्रवालः
एम. ए.

राष्ट्रमहिमा

हरितभारतभूमिरियं सदा, मुदितधर्मपरायणनागरा ।
प्रणयसूत्रनिबद्धदृढैकता, भवतु संयुगशान्तिकलेश्वरी ॥ ४॥

आकरो वीररत्नानामगाधो दर्शनोदके,
सादरो न्यायवेलायां, विस्मयो भारतोदधिः ॥ ५ ॥

नानापद्मं तडागं च, नानावर्णं यथा धनुः,
नानाद्रुमं यथोद्यानं, तथा राष्ट्रमिदं महत् ॥ ६ ॥

अभेदो यत्र भेदेषु, चारुता यस्य हारिणी,
अमृतं यस्य साहित्यं, भारतं भारतोपमम् ॥ ७ ॥

पूर्णं च पूर्णया दृष्ट्या, येन दृष्टं सदा जगत्,
भुक्तौ यस्य सदा मुक्तिर्ज्ञानकर्मसमन्वयात् ॥ ८ ॥

यस्यास्तिक्यशिलाभूमौ, पूर्वैः संस्कृतिमन्दिरम्,
स्थापयित्वा त्रिकालज्ञैः, कृतं कालप्रभावजित् ॥ ९ ॥

परैः सदा पदाक्रान्तं, स्वीयैरपि कदर्थितम्,
न व्यक्तित्वं हतं यस्य, पुराणं यच्च नूतनम् ॥ १० ॥

तदिदं लोकतन्त्रीयं, वर्धमानं धनैर्बलैः,
ज्ञानविज्ञानसन्तानं, यातु सर्वविधोदयम् ॥ ११ ॥

वीतमृत्यु (त्रिष्टुप् छन्दः)

भूमिर्यस्य दिव्यभूमिः प्रकृत्या,
स्निग्धैः श्यामैर्वृक्षगुल्मैः प्रकीर्णा,
रत्नैर्दिव्यैः पूरिता धातुभिश्च,
वर्षं लोके भारतं वीतमृत्यु ॥ १२ ॥

यस्याजस्रं पुण्यतोया वहन्ति,
नद्यो गङ्गायमुनानर्मदाद्याः ।
उच्चा यस्य सानुमन्तः पृथिव्याम्,
वर्षं लोके भारतं वीतमृत्यु ॥ १३ ॥

आर्या यत्र मुनयः संबभूवुः,
भूतं भव्यं वर्तमानं विदुःस्म,
भद्रं येभ्यः स्थावरजङ्गमानाम्,
वर्षं लोके भारतं वीतमृत्यु ॥ १४ ॥

यस्योत्सङ्गे क्रीडितं विश्ववन्द्यैः,
ऋषिभिर्मुनिभिः सद्भिः सुखेन,
नैव गणना शक्या यन्महिम्नो,
वर्षं लोके भारतं वीतमृत्यु ॥ १५ ॥

उग्रं येन विक्रान्तमाहवेषु,
शत्रोर्भूत्वा नागपाशेन कण्ठे,
न चादेयं सुहृदां यस्य किञ्चिद्,
वर्षं लोके भारतं वीतमृत्यु ॥ १६ ॥

नाना यत्र संस्कृतयो मिलन्ति,
धारा यथा संगताः स्युः सहस्रम्,
अनन्तशाखो वट एक एवं,
वर्षं लोके भारतं वीतमृत्यु ॥ १७ ॥

एको देवः सर्वभूतेषु गूढः,
पूर्वैर्नाम यस्य दृष्टः पुरस्तात्,
बन्धुर्भूता सर्वतो यस्य धात्री,
वर्षं लोके भारतं वीतमृत्यु ॥ १८ ॥

द्विड्भिर्यस्य दण्डिता साधुतैव,
भेदावर्ते सन्ततिर्यस्यमग्ना,
धात्रा सत्ता रक्षिता किन्तु यस्य,
वर्षं लोके भारतं वीतमृत्यु ॥ १९ ॥

प्रतियल्लोकाः पश्यन्ति शान्तये,
येन विश्वं वीक्षितं सर्वरूपम्,
आश्चर्यवद् वीक्ष्यमाणं मनुष्यैः,
वर्षं लोके भारतं वीतमृत्यु ॥ २०

नागरिकलक्षणानि

सुपौरैरुह्यते सुष्ठु, लोकतन्त्रधुरा गुरुः,
कीर्तनीया गुणास्तेषां, जनकल्याणबन्धुभिः ॥ २१ ॥

युद्धे वा शान्तिकाले वा, कार्ये दत्तावधानता
पालनं नियमानां च, विहितानां स्वसंसदा ॥ २२ ॥

मतदाने न शैथिल्यं, सामान्ये मध्यमेऽपि वा,
क्षेत्रे धर्मे दले जातौ, पक्षपातो न कश्चन ॥ २३ ॥

करदानं यथानीति, न स्वप्ने करमोषणम्,
राज्ये नाम पदं प्राप्य, नैवोत्कोचबुभुक्षुता ॥ २४ ॥

मानो राष्ट्रपताकाया, रक्षणं राष्ट्रसम्पदाम्,
अद्रोहः सर्वभाषासु, राष्ट्रभाषाकृते रुचिः ॥ २५ ॥

न संकुचितलाभार्थं, याच्ञा विधायकान् प्रति,
लोकहितकृते तेषां, सदा ध्यानानुकर्षणम् ॥ २६ ॥

धैर्यधारणमापाते, नापवादप्रवर्तनम्,
प्रोत्साहनं च लोकानां, सत्यासत्यैः सुभाषितैः ॥ २७ ॥

बन्धुता सर्वराज्येषु, सर्वधर्मसमादरः,
न श्रमकर्मणो लज्जा, स्नातकस्य कलास्वपि ॥ २८ ॥

न विशेषाधिकारेषु, वाञ्छाकापि कदाचन,
मङ्गल्या रुचिरन्येषु, यथा देशं यथा क्षणम् ॥ २९ ॥

भूगोलस्येतिहासस्य, सामान्यमनुशीलनम्,
ज्ञानं दैनिकवार्तानां, दैशिकीनां विशेषतः ॥ ३० ॥

सतर्कताधिकारेषु, कर्त्तव्येऽदीर्घसूत्रता,
अन्यायप्रतिरोधश्च, यथाबलमहिंसया ॥ ३१ ॥

इत्यादिभिर्गुणैर्युक्तैः पौररत्नैरलङ्कृतम्,
राज्यं नाम बलं, वित्तं कीर्तिं, जयं च विन्दते ॥ ३२ ॥

युगविभूतयः

व्यक्तयो न महीयांसो, विश्वरूपा असंशयम्,
वसुधा धारणौदार्ये, महार्णवानुकारिणः ॥ ३३ ॥

नाममात्रे श्रुते यस्य, जागर्ति जनचेतना,
मृत्यौ यस्य न विश्वासस्तदृते कस्य नेतृता ॥ ३४ ॥

सत्याहिंसे धृतिं बुद्धिं, कर्मयोगं समाश्रितः,
नेतृणामभवन्नेता, पूज्यो राष्ट्रपिता भुवः ॥ ३५ ॥

वल्लभो न हि नीतिज्ञो, मालाकारः स कृत्यवित्,
मातुर्येन कृता कण्ठे, राज्यमुक्तावली नवा ॥ ३६ ॥

सर्वशक्तिमयत्वेऽपि, यो जनतन्त्रमास्थितः,
अग्रणीर्बुद्धिवृद्धानां, माननीयो जवाहरः ॥ ३७ ॥

उद्दीपयन्ति भेदाग्निं, नेतारः प्रायशो जने,
शास्त्रिणां सदृशा लोके, दुर्लभा विश्वबन्धवः ॥ ३८ ॥

बुद्धिर्गरीयसी शक्तेर्निर्भूते प्रियदर्शिनी,
कुर्वाणा बंगलाराज्यं संप्रयुज्य बलं नयैः ॥ ३९ ॥

विनिपातोच्छ्रयौ तस्या, डिण्डिमनादघोषणा,
उत्थानं पतनं लोके, चक्रवत्परिवर्तिनी ॥ ४० ॥

मितभाषी क्रियासारश्छलच्छद्मविवर्जितः,
समुद्र इव गाम्भीर्ये, मुरारिर्जननायकः ॥ ४१ ॥

अहिंसावलमाश्रित्य, निर्जिता येन दस्यवः,
पञ्च येन कृतान्येकं, जयी स स प्रकाशवान् ॥ ४२ ॥

जीवनगीतिः*

मा मे स्म वादीर्ननु शोकगीतैः,
यज्जीवितं स्वप्न इहास्ति शून्यः ।
यतः शयानो मृत एव जन्तुः,
तथा न वस्तूनि यथा विभान्ति ॥ ४३ ॥

सत्यागभीरा खलु जीवयात्रा,
देहावसानेन न याति चान्तम् ।
मृदेव जन्तुर्भविता मृदेव,
नात्मानमुद्दिश्य कथा प्रवृत्ता ॥ ४४ ॥

सुखस्य दुःखस्य च योऽत्र भोगः,
स ना न लक्ष्यं विहितं न पन्थाः ।
क्रमेण नित्यं विदधद्विवृद्धिम्,
यत्कर्म तद्वै पुरुषार्थ इष्टः ॥ ४५ ॥

अत्येति कालो विपुलं च कार्यम्,
कुतोऽस्ति शैथिल्यकृतेऽवकाशः ?
कुर्वन्ति घं घं हृदयानि नृणाम्,
शवः श्मशानाभिमुखः प्रयाति ॥ ४६ ॥

---

* H.W. Longfellow महोदयस्य आंग्लकवेः' A Psalm of Life' इति कवितायाः पद्यानुवादः ।

रणाजिरं नाम वृहच्च लोको,
निवेशनं यत्र वयो लघीयः।
मा भूः पशुर्दण्डबलेन नेयः,
संघर्षसारो भव युद्धवीरः ॥ ४७ ॥

मृषा मनोराज्यसुखं सुरम्य-
मतीतचिन्तापि वृथा नरस्य।
स्वाधीनकाले भज कर्मनिष्ठाम्,
संकल्पशीलो हरिमाश्रितः सन् ॥ ४८ ॥

दिशन्ति शिक्षां महतां सुगाथाः
क्षमा वयं भव्ययितुं स्वजन्म।
शक्या व्रजद्भिः पदचिह्नपंक्तिः,
विलेखितुं पांसुषु कालमार्गे ॥ ४९ ॥

विलोक्य चैनां पदचिह्नपंक्तिम्,
नौभज्जनैराश्यविलुप्तचेताः,
तरन् समुद्रं वयसो गभीरम्,
कश्चित्पुनर्यातु धृतिं मनुष्यः ॥ ५० ॥

अतः समुत्थाय रतः क्रियासु,
धैर्येण सोढा सुखदुःखयोः स्याः।
जिज्ञासमानः सततं च जानन्,
कुरुष्व कर्माणि फलेष्वसक्तः ॥ ५१ ॥

सूक्तयः

पर्यावृते राजनयेन जीविते,
धर्मेऽपि याते जगदेकसाध्यताम्,
विनाश्यमाने च सुमानुषे बलाद्,
दावाग्निधूमः परितः प्रवर्तते ॥ ५२ ॥

अनृतदुर्दिनासारैः राजनीतिपयोधरैः,
आवृते जगदाकाशे, निलीनः सत्यचन्द्रमाः ॥ ५३ ॥

असत्यं भाषते मञ्चात्सत्यस्य मुद्रितं मुखम्,
शप्यमानं दरिद्रेण, हिरण्यं नायकायते ॥ ५४ ॥

अहो केन कदा बन्धो, यन्त्रिताः स्थितयस्तथा,
न शक्नोति जनः कश्चिद्वक्तुं यद्धि विवक्षितम् ॥ ५५ ॥

अपनयमाश्रयते यं, धिक् तं निन्देत्स्वयं नयो वाचा,
कालः कीदृग्बन्धो, जगद्वत जयति विज्ञापनम् ॥ ५६ ॥

राजनीतिररण्यानी, दलराजिर्विषद्रुमाः,
तमो व्याप्नोति सर्वत्र, किं दृश्येत किमस्ति किम् ॥ ५७ ॥

इन्द्रजालं महन्मन्ये, राजनीतिं दलाश्रिताम्,
मन्दं गुरुं गुरुं मन्दं, दर्शयन्तीं जनं नृणाम् ॥ ५८ ॥

विज्ञापितोऽभविष्यच्चेद्यादृशोऽस्ति तथा दलैः,
अभविष्यन्मनुष्याणां, पूजास्पदमसौ नयी ॥ ५९ ॥

अन्धतामिस्रलोकोऽयं, लोकः केन व्यधीयत,
नेत्रवन्तो न जानन्ति, कः पन्थाः का दिशः कुतः ॥ ६० ॥

वचोभिः शान्तिमिच्छन्ति, कर्मभिर्युद्धचोदकाः,
नयेन वञ्चितो लोको, महात्मा छन्दचारिणा ॥ ६१ ॥

प्राचीनैः स्खलितं यत्र, दूरं तत्र वयं गताः,
गत्वरा यत्र तेऽभूवन्, शेरते तत्र नः पदाः ॥ ६२ ॥

वहुभूमि महासेनं, भूरिलोकं वसुस्थलम्,
सद्वृत्तेन विना राज्यं, कृशमूलं गृहं गुरु ॥ ६३ ॥

कर्तव्यैरधिकाराणां, दाम्पत्यं कृतिभिर्मतम्,
अभिलाषोऽधिकारेषु कर्तव्यविरहे लघुः ॥ ६४ ॥

यावत्स्वमूल्यमिच्छन्ति, प्रत्याशिभ्यः समर्थकाः,
सर्वं शोकमयं तावत्, पाहि पाहि मुखे मुखे ॥ ६५ ॥

राजतन्त्रेषु सर्वत्र, यथा राजा तथा प्रजाः,
विचित्रं लोकतन्त्रस्य, तथा नेता यथा प्रजाः ॥ ६६ ॥

अन्यतन्त्राणि सुप्तासु, संचरेयुर्यथा तथा,
प्रकृतिष्वप्रबुद्धासु, लोकतन्त्रस्य पङ्गुता ॥ ६७ ॥

पुंसाप्रकृतिसंयोगः, सर्गभावस्य कारणम्,
लोकराज्योदयस्यापि. मूलं संवर्तनं द्वयोः ॥ ६८ ॥

मतदानाधिकारं स्वं, राष्ट्रन्यासं विदन्ति ये,
लोकराज्यनिकेतस्य, स्तम्भभूता विचक्षणाः ॥ ६९ ॥

अकृष्टा धर्मफालेन, सत्यबीजं न लम्भिता,
जननी दुःखशूलानां, राजनीतिवसुन्धरा ॥ ७० ॥

प्रमाणं भारतातीतं, धर्मः सनातनोऽपि सन्,
अव्याख्यातो यथाकालं हानये नाभिवृद्धये ॥ ७१ ॥

यद्यपि तत्त्वरूपेण, धर्म एकः सदा किल,
नवे युगे नवं प्राज्ञैरव्याख्यातो न कामदः ॥ ७२ ॥

साक्षरेणापि लोकेन, न भाव्यं श्रमभीरुणा ।
कुदृग्दाललेखिनीयोगः, कल्पिता राष्ट्रभूतये ॥ ७३ ॥

पतित्वा च पतित्वा च, समुत्थाय पुनः पुनः,
अग्रे व्रजन्ति ये धीरा, ईशते नाम ते श्रियः ॥ ७४ ॥

तारस्वरेण जल्पन्तः कुत्स्यानि महतां मतैः,
साधयन्ति स्वकार्याणि प्रवीणा हि युगे युगे ॥ ७५ ॥

अहो बत महत्पापं वायसैर्मिलितैरसौ,
कलनादो मरालस्य, कौ-रवेण तिरोहितः ॥ ७६ ॥

प्राचीनाः प्रतिमा लोके, विभज्यन्ते प्रयत्नतः,
नव्याः प्रतिविधीयन्ते, परम्पराप्रियो जनः ॥ ७७ ॥

आकर्षणानि विविधानि गतिं हरन्ति,
कर्षन्ति चाग्रत इमे सुयशोऽभिलाषाः,
एवञ्च खेलकपदाहतकन्दुकस्य,
पीडामिवानुभवतीह मनो विलोलम् ॥ ७८ ॥

वृद्धयोर्जायते पुत्रो दुःखसंवेदनाय वै,
प्रौढ़ाः सोदर्यंजायास्तं, सपत्नीतनयं विदुः ॥ ७९ ॥

मन उच्चं वपुः क्षीणं, द्वैधीभावे गतं वयः,
आलोको वैद्युतः कुत्र तारभङ्गेऽपि धारया ॥ ८० ॥

अमी तुलसिदासाद्याः प्रेता अप्युपकुर्वते,
छायापुष्पफलैर्हीनास्तरुस्तम्भा वयं स्थिताः ॥ ८१ ॥

यथेष्टं कस्य सम्भूतं, कुत्र किं किं कदा वद,
ईदृशे तादृशे जाते, विषीदसि कथं मनः ॥ ८२ ॥

व्ययागमौ सुखं दुःखं, यथाकालं यथाक्रमम्,
प्रवर्तन्ते यथाऽदृष्टं, चित्रं द्रष्टुर्यथा चलम् ॥ ८३ ॥

आवेशे परमं श्रेयान्, पन्था यस्तु प्रतीयते,
दुर्विपाककशाघाते, व्रीडते तमनुस्मरन् ॥ ८४ ॥

जीर्णमलिनवस्त्रेषु, नैराश्यलुप्तमानसम्,
स्मारं स्मारं वयो वीतं, वेदना शनकैर्हृदि ॥ ८५ ॥

नगरे दूषितो वायुर्ग्रामे बुभुक्षुताभयम्,
अहो ! विवशता चित्रा युगे स्वातन्त्र्यशापिनी ॥ ८६ ॥

किं दैवं किं नु वा राज्यं, दोषस्थं न हि लभ्यते,
सुरूपं राजकन्यानां, शोचनं च क्वणे क्वणे ॥ ८७ ॥

तत्स्वास्थ्यं तत्सुरूपत्वं, सौकुमार्यं मनस्विता,
रम्यं दारिद्र्यचक्रेण, क्षुण्णं तत्सुमनोवनम् ॥ ८८ ॥

सामान्यव्यवहारेण, सभ्यासभ्यनिरूपणम्,
सशौर्यबलिदानार्थं संयोगा न दिने दिने ॥ ८९ ॥

क्षमादानं परागःसु, बहूनां सुकरं नृणाम्,
आगसः स्वीकृतिः स्वस्थं, विरलस्य महात्मनः ॥ ९० ॥

मनोरथाश्चेत्तुरगा भवेयुः,
आरुह्य नन्दन्तु सुखेन मूढाः।
आहूयमाना उपयान्तु कूपाः,
प्रमादिनः शान्ततृषा रमेरन् ॥ ९१ ॥

यत्तद्वसन्तरम्येण, क्षणं रूपेण लोभितम्,
तमुपलभ्य निर्विद्यं, निर्विण्णं सहसा मनः ॥ ९२ ॥

न राजनीत्या कविता परीक्ष्या.
विशिष्यते राजबलैर्न काव्यम्।
तदीयमानाय कृता सुविज्ञैः,
नोपेक्षणीया नियमाः सुधीभिः ॥ ९३ ॥

पण्डिता बहवो भूता, विपुलो ग्रन्थपर्वतः,
व्यक्तिव्यक्तित्ववैभिन्न्यात्काव्यं नवं युगे युगे ॥ ९४ ॥

यावद्वारमधीयन्ते, कवीन्द्राः काव्यसम्पदः,
रसो नवो नवा अर्थाः, प्रस्फुरन्ति सचेतसाम् ॥ ९५ ॥

महार्थसारवाणीकाः, स्वामिनः काव्यशेवधेः,
सूरयो माघसंकाशा, गर्विता अल्पमेधसः ॥ ९६ ॥

एकस्मिन् कालिदासस्यं, द्वयोस्तयोः पृथक्-पृथक्,
त्रये माघस्य सौराज्यं, गर्वराजा वयं कृताः ॥ ९७ ॥

स्वभावकर्कशा वाण्यां, वृत्तयो नयवेदिनाम्,
हृदा हीनानि तन्त्राणि, डिजरैली महोदयः* ॥ ९८ ॥

आत्मबुद्धिहृदां यावच्छरीरे मित्र संस्थितिः.
धर्मविज्ञानकाव्यानां शिक्षा तावत्समन्वयः ॥ ९९ ॥

न्याय्यं न मुञ्चता मार्गं, वर्तितव्यं यथा युगम्,
अपरिवर्तनं मृत्युर्जीवनं परिवर्तनम् ॥ १०० ॥

भो भो वृक्षाः पृष्ठतस्त्यज्यमानाः !
मा मा वेदि स्नेहशून्या वयं स्मः
वृत्तं तावद्गच्छतामग्रतो नो,
बन्धुर्जाता नूतना शाखिराजिः ॥ १०१ ॥

देशाटनं पण्डितमित्रता वा (वै)
आकाशवाणी विविधाश्च गोष्ठ्यः।
संवादपत्राणि च पुस्तकानि,
चातुर्यमूलानि घनानि षट् स्युः ॥ १०२ ॥

---

* मातृराजकृते तापसवत्सराजे नाम नाटके रुमण्वत उक्तिः :—स्वभावककंशाः खलु नयवेदिनां वृत्तयः। आंग्लदेशप्रधानमन्त्रि डिजरैलीमहोदयोऽपि घोषयति—Governments are heartless इति भावसामान्यं सूचयति।

॥ शरणागतिः ॥

सजलजलदनीलं रक्तराजीवनेत्र—
मधरमधुरवंशीवादनं विश्वमोहम्
कृतपरवशगोपीचित्तपीतोत्तरीयम्
सकलसुखसमुद्रं कृष्णचन्द्रं नमामि ॥ १०३ ॥

पादौ कृष्णस्य मे वित्तं, पादौ कृष्णस्य मे गतिः,
सर्वं त्यक्त्वा भजे कृष्णं, कृष्णो मित्रमिहामुतः ॥ १०४ ॥

यत्स्पृष्ट्वा रविनन्दिनीजलरयः शान्तिं ययावुत्थितो,
यत्स्पर्शेन गता व्रजस्य वसुधा त्रैलोक्यवन्द्यं पदम् ।
गोपीगोपकुलं निरीहमधनं यद्भक्तिमत्त्वात्सुकृत्,
राधावल्लभपादपद्मयुगलं सर्वात्मना तद्भजे ॥ १०५ ॥

शान्तिं यत्र जनो हि गच्छति परां तापत्रयेणार्दितो,
यत्प्रीत्या परया च विश्वगुरुभिर्ब्रह्मादिभिः सेव्यते,
गत्वा यत्र चला च सिन्धुतनया संजायते सुस्थिरा,
तद्गोविन्दपदारविन्दयुगलं दीनस्य मे संबलम् ॥ १०६ ॥

मोक्ष्यामि नैतं नवनीतचौर—
मायाति भूयो यदि चित्तगेहम् ।

आधृत्य पादौ हृदयप्रकोष्ठे,
आवासयिष्यामि दृढं पिधाय ॥ १०७ ॥

इति विरचित पद्यवाटिकोऽयं,
विकलितदृक् पुरुषः स लक्ष्मणाख्य ।
हरिपदकमले सुखं रिरंसुः,
विनयपुरःसरमत्र नौति नम्यान् ॥ १०८ ॥

— इति —

समर्पणम्

पद्यपुष्पवाटिका नाम नूतनेयम् रचना पाठकमहोदयानाम् करकमलेषु सहर्षं समर्प्यते। अत्र हि विगतेषु पञ्चदशसु वर्षेषु यदा-कदा रचितानां मुक्तकपद्यानाम् संग्रहो विद्यते। वैदिकत्रिष्टुप्छन्दसि विहिता वीतमृत्युशीर्षका पद्यावली कदाचिदस्या रचनायाः प्रमुख-विशेषता प्रतिभाति। स्पष्टमेव वैदिकछन्दसो नानाविधा विशेषतास्तत्र स्वभावत एव सुदुर्लभाः, तथापि भावपेशलतया कवितेयं सहृदयानव-श्यमेव तरलीकरिष्यतीति सुतरामाशास्यते। आङ्ग्लभाषाकवेः H. W. Longfellow महोदयस्य 'A Psalm of Life' इति नामधेयायाः कवितायाः पद्यानुवादोऽपि नवीनः कोऽपि प्रयोगः। अन्यत्तु सर्वमेव यादृच्छिको हृदयोद्गारो, न किमपि विशेषवक्तव्यमपेक्ष्यते।

निवेदकः

लछमनसिंहः अग्रवालः

पूर्वप्रकाशितानि पुस्तकानि

१. कालरात्रि : मूल्यम् रु० ४)

२. राष्ट्रदर्पण: ,, रु० ६)

३. विज्ञानगीतम् ,, रु० ६)

(हरियाणा स[illegible]रा पुरस्कृतम्)

४. कुटुम्बिनी मूल्यम् रु० ६)

× × × ×

प्राप्तिस्थानम्—

लछमनसिंह: अग्रवाल:

द्वारा जगनीमल मेहरचन्द,

जनरल मर्चेण्ट्स, अग्रसैन चौक,

वल्लबगढ़—१२१००४.

जिला— फरीदाबाद.

चौहान आर्ट प्रैस, करोल बाग नई दिल्ली-११०००५